हरिद्रा
(सांस्कृतिक शोध का अन्तराष्ट्रिय उपक्रम)
ISSN : 2582-9092

# ऋग्वेदीयाक्षसूक्तस्य सामाजिकमहत्त्वम्

डॉ. प्रणवज्योति डेका

**सारांशः** – वेदेषु ऋग्वेद आदिमोऽस्ति। तत्र दशममण्डलस्य चतुस्त्रिंशत्तमं सूक्तमस्ति अक्षसूक्तम्। अस्मिन् सूक्ते कितवस्य जीवने द्यूतक्रीडया किं किमभवत् तद्विषयः स्पष्टतया वर्णितोऽस्ति। कृषिकर्मस्योपरि नियोजनेनैव द्यूतात् मुक्तिलाभं भवतीत्यत्र कृषिप्रशंसा अपि दृश्यते। वैदिककाले द्यूतक्रीडायाः कुफलम् अनेन सूक्तेनैव अवगम्यते। अधुना अपि अस्माकं समाजे अस्य कुफलं परिदृश्यते। समाजे प्रचलिता द्युतक्रीडा ऋग्वेदमतानुसारं परिहारं कथं कर्तुं शक्यते तदेव पत्रेऽस्मिन् पर्यालोचितं भविष्यति।

**मुख्यशब्दानि** – अक्षः, ऋग्वेदः, द्युतक्रीडा।

१. **शोधोद्देश्यम्** – ऋग्वेदस्यदशममण्डलस्य चतुस्त्रिंशत्तमं सूक्तमस्ति अक्षसूक्तम्१। अस्मिन् सूक्ते कितवस्य जीवने द्यूतक्रीडया किं किमभवत् तद्विषयः स्पष्टतया वर्णितोऽस्ति। कृषिकर्मस्योपरि नियोजनेनैव द्यूतात् मुक्तिलाभं भवतीत्यत्र कृषिप्रशंसा२ अपि दृश्यते। वैदिककाले द्यूतक्रीडायाः कुफलम् अनेन सूक्तेनैव अवबोधनं जायते। अधुना अपि अस्माकं समाजे अस्य कुफलं परिदृश्यते। समाजस्य व्याधिरूपस्यअक्षस्य स्पृहां कथं परित्यक्तुं शक्यते तत्पर्यालोचनमेव शोधपत्रस्यास्यउद्देश्यम्।

२. **विश्लेषणम्** – सूक्तेऽस्मिन् प्राप्यते यत् – अक्षस्य कारणात् कितवेन अनुकूला जाया अपि परित्यज्यते। किं च जायायाः मात्रा गृहगतः कितवो निन्द्यते। यथा कामव्यसनेन अभिभूयमाना स्वैरिणी संकेतस्थानं गच्छति तद्वत्अक्षस्य स्पृहां परित्यक्तुं संकल्पं कृत्वा अपि यदा बभ्रुवर्णा अक्षाः कितवैरवक्षिप्ताः सन्तः शब्दं कुर्वन्ति तदा संकल्पं परित्यज्य अक्षाणां निष्कृतं स्थानं प्रति सः कितवो गच्छति। तत्र प्रतिदेवित्रे कितवाय देवनोपयुक्तानि कर्माणि जयार्थमाभिमुख्येन अस्य कितवस्य इच्छाम् अक्षाः वर्धयन्ति। उक्तञ्च ऋक्संहितायाम् –

**यदादीध्ये न दविषाण्येऽभिः**
**परायद्भ्योऽवहीये सखिभ्यः।**
**न्युप्ताश्च बभ्रवो वाचमक्रतँ**
**एमीदेषां निष्कृतं जारिणीव।।३**

२.१ अक्षा एव अंकुशवन्तः नितोदितवन्तश्च पराजये निकर्तनशीलश्छेत्तारो वा पराजये कितवस्य सन्तापकाः सर्वस्वहारकत्वेन कुटुम्बस्य सन्तापनशीलाश्च भवन्ति। किं च जयतः कितवस्य धनदानेन धान्यतां लम्भयन्तः कुमाराणां दातारो भवन्ति। यथा बालः किमपि दत्वा पुनरपि तत् प्राप्तुमिच्छति तथा

अक्षोऽपि धनं दत्वा तत् पुनरपि हरति । अपि च मधुना संपृक्ताः प्रतिकितवेन परिवृद्धेन सर्वस्वहरणेन कितवस्य पुनर्हन्तारो भवन्ति। ऋक्संहितायामुद्धृतमस्ति यत् –

**अक्षास इदङ्कुशिनो नितोदिनो**
**निकृत्वानस्तपनास्तापयिष्णवः।**
**कुमारदेष्णा जयतः पुनर्हणो**
**मध्वा संपृक्ताः कितवस्य बर्हणा ।।४**

२.२ क्रूरस्यापि क्रोधाय एते अक्षाः न प्रह्वीभवन्ति अर्थात् न वशे वर्तन्ते। राजा अपि एभ्यः नमस्कारमेव देवनवेलायां नावज्ञां करोति। एते नीचीनस्थले वर्तन्ते तथापि पराजयात् भीतानां द्यूतकराणां कितवानां हृदयस्योपरि स्फुरन्ति। हस्तरहिता अप्यक्षाः हस्तवन्तं द्यूतकरं कितवं पराजयकरणेनाभिभवन्ति। दिवि भवा अङ्गारसदृशा अक्षा इन्धनरहिते आस्फारे न्युप्ताः शीतस्पर्शाः सन्त अपि कितवानामन्तःकरणं पराजयजनितसन्तापेन भस्मीकुर्वन्ति। प्रोक्तञ्च ऋग्वेदे –

नीचा वर्तन्त उपरि स्फुर–

**न्त्यहस्तासो हस्तवन्तं सहन्ते ।**
**दिव्या अङ्गारा इरिणे न्युप्ताः**
**शीताः सन्तो हृदयं निर्दहन्ति ।।५**

२.३ अक्षपराजयादृणवान् कितवः स्तेयजनितं धनं कामयमानः अन्येषां गृहं रात्रौ चौर्यार्थमुपगच्छति। तत्र स्वव्यतिरिक्तानां पुरुषाणां जायां सुखेन वर्तमानां दृष्ट्वा मज्जाया दुःखिता इति ज्ञात्वा तप्तते। ऋक्संहितायां कथितमस्ति यत् –

**स्त्रियं दृष्ट्वाय कितवं ततापा–**
**न्येषां जायां सुकृतं च योनिम्।**
**पूर्वाह्णे अश्वान्युयुजे हि बभ्रू–**
**न्त्सो अग्नेरन्ते वृषलः पपाठ।।६**

२.४ एतद् अवबोध्यते यत् द्यूतक्रीडायां बहवोऽनर्थाः सन्ति। महाभारते७ अपि अस्य कु–प्रभावो वर्णितोऽस्ति। पाण्डवाः अक्षस्य कृते जायां द्रौपदीमपि परित्यक्तवन्तः। अत एव द्यूतं मा करणीयम्। कृषिकार्यमेव करणीयम्। यतोहि कृषिकार्ये बहवो गुणाः सन्ति। कृष्या सम्पादिते धने स्वल्प एवोपार्जिते बहु एतदेवेति मन्यमानः रतिः करणीया। वित्तलोभेन द्यूते मा समर्पणीयम्। एतदेव वर्णितमस्ति अक्षसूक्ते –

अक्षैर्मा दीव्यः कृषिमित्कृषस्व
वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया
तन्मे वि चष्टे सवितायमर्यः।।८

## ३. निष्कर्षः –

वर्तमानकाले अपि अस्माकं समाजे द्युतक्रीडा प्रचलिताऽस्ति। तस्याः कु–प्रभावः समाजे सर्वत्रैव परिलक्षितो वर्तते। ऋग्वेदानुसारं द्युतक्रीडां परित्यज्य स्व स्व कर्मणि यदि वयं तत्परो भवामः तदा एव सुसमाजस्य परिकल्पना कर्तुं शक्यते। स्वल्प एवोपार्जिते बहु एतदेवेति मन्यमानः जीवनमतिवाहितकरणेन सुखानुभवं प्राप्तुं शक्यते। वित्तलोभेन यदि द्यूतं प्रति आकृष्टो भवामः तर्हि जीवने बहु अनर्थाः भविष्यन्त्यैव।

## सन्दर्भसूत्राणि –

१. ऋग्वेदसंहिता, १०.३४
२. तत्रैव, १०.३४.१३
३. तत्रैव, १०.३४.५
४. तत्रैव, १०.३४.७
५. तत्रैव, १०.३४.६
६. तत्रैव, १०.३४.११
७. महाभारतम्, २.८६
८. ऋग्वेदसंहिता, १०.३४.१३

## सन्दर्भग्रन्थाः –

१. श्रीमत्सायणाचार्यविरचितभाष्यसमेता ऋग्वेदसंहिता (१–१०मण्डलात्मकः), वैदिकसंशोधनमण्डलम्, पुने–५११०३७, २००१ (पुनःमुद्रणम् )
२. न्यू वैदिक सिलेक्शन, भागः २, तैलंग एण्ड चौबे, भारतीयविद्याप्रकाशनम्, दिल्ली, २०१८
३. वैकिकवाङ्मयस्येतिहासः, सम्पादकः– आचार्य जगदीशचन्द्रमिश्रः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, २०२१
४. महाभारतम् https://sa-wikisource-org/s/1td

**सहायकाचार्यः**
संस्कृतवेदाध्ययनविभागः,
कुमारभास्करवर्मसंस्कृत–पुरातनताध्ययनविश्वविद्यालयः, नलबारी, असमप्रदेशः।